# Shri Vishnu MahimnaH Stotram

# શ્રીવિષ્ણુમહિમ્નસ્તોત્રમ્

## Document Information

Text title : viShNumahimnaH stotram 1

File name : vishhnumahimna.itx

Category : vishhnu, stotra, brahmAnanda, vishnu

Location : doc_vishhnu

Author : brahmAnanda

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : December 30, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 18, 2023

*sanskritdocuments.org*

# શ્રીવિષ્ણુમહિમ્નસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।

મહિમ્નસ્તે પારં વિધિહરફણીન્દ્રપ્રભૃતયો
    વિદુર્નાધીપ્યજ્ઞાશ્ચલમતિરહો નાથ નુ કથમ્ ।
વિજાનીયામદ્ધા નલિનનયનાત્મીયવચસો
    વિશુદ્ધ્યૈ વક્ષ્યામીષદપિ તુ તથાપિ સ્વમતિતઃ ॥ ૧॥

યદાહુર્બ્રહ્મૈકે પુરુષમિતરે કર્મ ચ
    પરેઽપરે બુદ્ધં ચાન્યે શિવમપિ ચ ધાતારમપરે ।
તથા શક્તિં કેચિદ્ગણપતિમુતાર્કં ચ
    સુધિયો મતીનાં વૈ ભેદાત્ત્વમસિ તદશેષં મમ મતિઃ ॥ ૨॥

શિવઃ પાદામ્ભસ્તે શિરસિ ધૃતવાનાદરયુતં
    તથા શક્તિશ્ચાસૌ તવ તનુજતેજોમયતનુઃ ।
દિનેશં ચૈવામું તવ નયનમૂચુસ્તુ નિયમાસ્ત્વદન્યઃ
    કો ધ્યેયો જગતિ કિલ દેવો વદ વિભો ॥ ૩॥

ક્વચિન્મત્સ્યઃ કૂર્મઃ ક્વચિદપિ વરાહો નરહરિઃ
    ક્વચિત્ખર્વો રામો દશરથસુતો નન્દતનયઃ ।
ક્વચિદ્બુદ્ધઃ કલ્કિર્વિહરસિ કુભારાપહૃતયે
    સ્વતન્ત્રોઽજો નિત્યો વિભુરપિ તવાક્રીડનમિદમ્ ॥ ૪॥

હૃતામ્નાયેનોક્તં સ્તવનવરમાકર્ણ્ય વિધિના
    દ્રુતં માત્સ્યં ધૃત્વા વપુરજરશઙ્ખાસુરમથો ।
ક્ષયં નીત્વા મૃત્યોર્નિગમગણમુદ્ધૃત્ય જલધેરશેષં
    સઙ્ગુપ્તં જગદપિ ચ વેદૈકશરણમ્ ॥ ૫॥

નિમજ્જન્તં વાર્ધૌ નગવરમુપાલોક્ય
    સહસા હિતાર્થં દેવાનાં કમઠવપુષાઽઽવિશ્ય ગહનમ્ ।
પયોરાશિં પૃષ્ઠે તમજિત સલીલં ધૃતવતો

જગદ્ધાતુસ્તેઽભૂત્કિમુ સુલભભારાય ગિરિકઃ ॥ ૬॥

હિરણ્યાક્ષઃ ક્ષોણીમવિશદસુરો નક્રનિલયં
સમાદાયામર્ત્યૈઃ કમલજમુખૈરમ્બરગતૈઃ ।
સ્તુતેનાનન્તાત્મન્નચિરમવભાતિ સ્મ
વિધૃતા ત્વયા દંષ્ટ્રાગ્રેઽસાવવનિરખિલા કન્દુક ઇવ ॥ ૭॥

હરિઃ ક્વાસ્તીત્યુક્તે દનુજપતિનાઽઽપૂર્ય
નિખિલં જગન્નાદૈઃ સ્તમ્ભાન્નરહરિશરીરેણ કરજૈઃ ।
સમુત્પત્યાશૂરાવસુરવરમાદારિતવતસ્તવાખ્યાતા
ભૂમન્કિમુ જગતિ નો સર્વગતતા ॥ ૮॥

વિલોક્યાજં દ્વાર્ગં કપટલઘુકાયં સુરરિપુર્નિષિદ્ધોઽપિ
પ્રાદાદસુરગુરુણાત્મીયમખિલમ્ ।
પ્રસન્નસ્તદ્ભક્ત્યા ત્યજસિ કિલ નાદ્યાપિ
ભવનં બલેર્ભક્તાધીન્યં તવ વિદિતમેવામરપતે ॥ ૯॥

સમાધાવાસક્તં નૃપતિતનયૈર્વીક્ષ્ય પિતરં હતં
બાણૈ રોષાદ્ગુરુતરમુપાદાય પરશુમ્ ।
વિના ક્ષત્રં વિષ્ણો ક્ષિતિતલમશેષં કૃતવસોઽસકૃત્કિં
ભૂભારોદ્ધરણપટુતા તે ન વિદિતા ॥ ૧૦॥

સમારાધ્યોમેશં ત્રિભુવનમિદં વાસવમુખં વશે
ચક્રે ચક્રિન્નગણયદનિશં જગદિદમ્ ।
ગતોઽસૌ લઙ્કેશસ્ત્વચિરમથ તે બાણવિષયં
ન કેનાપ્તં ત્વત્તઃ ફલમવિનયસ્યાસુરરિપો ॥ ૧૧॥

ક્વચિદ્દિવ્યં શૌર્યં ક્વચિદપિ રણે કાપુરુષતા
ક્વચિદ્ગીતાજ્ઞાનં ક્વચિદપિ પરસ્ત્રીવિહરણમ્ ।
ક્વચિન્મૃત્સ્નાશિત્વં ક્વચિદપિ ચ વૈકુણ્ઠવિભવશ્ચરિત્રં
તે નૂનં શરણદ વિમોહાય કુધિયામ્ ॥ ૧૨॥

ન હિંસ્યાદિત્યેદ્ધ્રુવમવિતથં વાક્યમબુધૈરથાગ્નીષોમીયં
પશુમિતિ તુ વિપ્રૈર્નિગદિતમ્ ।
તવૈતન્નાસ્થાનેઽસુરગણવિમોહાય ગદતઃ સમૃદ્ધિર્નીચાનાં
નયકર હિ દુઃખાય જગતઃ ॥ ૧૩॥

વિભાગે વર્ણાનાં નિગમનિચયે ચાવનિતલે
    વિલુપ્તે સઞ્જાતો દ્વિજવરગૃહે શમ્ભલપુરે ।
સમારુહ્યાશ્વં સ્વં લસદસિકરો
    મ્લેચ્છનિકરાન્નિહન્તાઽસ્યુન્મત્તાન્કિલ કલિયુગાન્તે યુગપતે ॥ ૧૪॥

ગભીરે કાસારે જલચરવરાકૃષ્ટચરણો રણેઽશક્તો
    મજ્જન્નભયદ જલેઽચિન્તયદસૌ ।
યદા નાગેન્દ્રસ્ત્વાં સપદિ પદપાશાદપગતો ગતઃ
    સ્વર્ગં સ્થાનં ભવતિ વિપદાં તે કિમુ જનઃ ॥ ૧૫॥

સુતૈઃ પૃષ્ટો વેધાઃ પ્રતિવચનદાનેઽપ્રભુરસાવથાત્મન્યાત્માનં
    શરણમગમત્ત્વાં ત્રિજગતામ્ ।
તતસ્તેઽસ્તાતઙ્કા યયુરથ મુદં હંસવપુષા
    ત્વયા તે સાર્વજ્ઞં પ્રથિતમમરેશેહ કિમુ નો ॥ ૧૬॥

સમાવિદ્ધો માતુર્વચનવિશિખૈરાશુ વિપિનં તપશ્ચક્રે
    ગત્વા તવ પરમતોષાય પરમમ્ ।
ધ્રુવો લેભે દિવ્યં પદમચલમલ્પેઽપિ વયસિ
    કિમસ્ત્યસ્મિઁલ્લોકે ત્વયિ વરદ તુષ્ટે દુરધિગમ્ ॥ ૧૭॥

વૃકાદ્ભીતસ્તૂર્ણં સ્વજનભયભિત્ત્વાં
    પશુપતિર્ભ્રમઁલ્લોકાન્સર્વાન્ શરણભુપયાતોઽથ દનુજઃ ।
સ્વયં ભસ્મીભૂતસ્તવ વચનભઙ્ગોદ્ધતમતી
    રમેશાહો માયા તવ દુરનુમેયાઽખિલજનૈઃ ।૧૮॥

હૃતં દૈત્યૈર્દૃષ્ટ્વાઽનૃતઘટમજય્યૈસ્તુ નયતઃ કટાક્ષૈઃ
    સંમોહં યુવતિવરવેષેણ દિતિજાન્ ।
સમગ્રં પીયૂષં સુભગ સુરપૂગાય દદતઃ સમસ્યાપિ
    પ્રાયસ્તવ ખલુ હિ ભૃત્યેષ્વભિરતિઃ ॥ ૧૯॥

સમાકૃષ્ટા દુષ્ટૈર્દ્રુપદતનયાઽલબ્ધશરણા સભાયાં
    સર્વાત્મંસ્તવ શરણમુચ્ચૈરુપગતા ।
સમક્ષં સર્વેષામભવદચિરં ચીરનિચયઃ સ્મૃતેસ્તે
    સાફલ્યં નયનવિષયં નો કિમુ સતામ્ ॥ ૨૦॥

વદન્ત્યેકે સ્થાનં તવ વરદ વૈકુણ્ઠમપરે
    ગવાં લોકં લોકં ફણિનિલયપાતાલમિતરે ।

તથાન્યે ક્ષીરોદં હૃદયનલિનં ચાપિ તુ સતાં ન મન્યે
તત્સ્થાનં ત્વહમિહ ચ યત્રાસિ ન વિભો ॥ ૨૧॥

શિવોઽહં રુદ્રાણામહમમરરાજો દિવિષદાં મુનીનાં
વ્યાસોઽહં સુરવર સમુદ્રોઽસ્મિ સરસામ્ ।
કુબેરો યક્ષાણામિતિ તવ વચો મન્દમતયે ન
જાને તજ્જાતં જગતિ નનુ યન્નાસિ ભગવન્ ॥ ૨૨॥

શિરો નાકો નેત્રે શશિદિનકરાવમ્બરમુરો દિશઃ
શ્રોતે વાણી નિગમનિકરસ્તે કટિરિલા ।
અકૂપારો બસ્તિશ્ચરણમપિ પાતાલમિતિ
વૈ સ્વરૂપં તેઽજ્ઞાત્વા નૃતનુમવજાનન્તિ કુધિયઃ ॥ ૨૩॥

શરીરં વૈકુણ્ઠં હૃદયનલિનં વાસસદનં મનોવૃત્તિસ્તાર્ક્ષ્યો
મતિરિયમથો સાગરસુતા ।
વિહારસ્તેઽવસ્થાત્રિતયમસવઃ પાર્ષદગણો ન પશ્યત્યજ્ઞા
ત્વામિહ બહિરહો યાતિ જનતા ॥ ૨૪॥

સુઘોરં કાન્તારં વિશતિ ચ તડાગં સુગહનં
તથોત્તુઙ્ગં શૃઙ્ગં સપદિ ચ સમારોહતિ ગિરેઃ ।
પ્રસૂનાર્થં ચેતોમ્બુજમમલમેકં ત્વયિ વિભો
સમર્પ્યાજ્ઞાસ્તૂર્ણં વત ન ચ સુખં વિન્દતિ જનઃ ॥ ૨૫॥

કૃતૈકાન્તાવાસા વિગતનિખિલાશાઃ શમપરા
જિતશ્વાસોચ્છ્વાસાસ્ત્રુટિતભવપાશાઃ સુયમિનઃ ।
પરં જ્યોતિઃ પશ્યન્ત્યનઘ યદિ પશ્યન્તુ મમ તુ
શ્રિયાશ્લિષ્ટં ભૂયાન્નયનવિષયં તે કિલ વપુઃ ॥ ૨૬॥

કદા ગઙ્ગોત્તુઙ્ગામલતરતરઙ્ગાચ્છપુલિને
વસન્નાશાપાશાદખિલખલદાશાદ્ અપગતઃ ।
અયે લક્ષ્મીકાન્તામ્બુજનયન તાતામરપતે
પ્રસીદેત્યાજલ્પન્નમરવર નેષ્યામિ સમયમ્ ॥ ૨૭॥

કદા શૃઙ્ગૈઃ સ્ફીતે મુનિગણપરીતે હિમનગે દ્રુમાવીતે
શીતે સુરમધુરગીતે પ્રતિવસન્ ।
ક્વચિદ્ધ્યાનાસક્તો વિષયસુવિરક્તો ભવહરં
સ્મરઁસ્તે પાદાબ્જં જનિહર સમેષ્યામિ વિલયમ્ ॥ ૨૮॥

સુધાપાનં જ્ઞાનં ન ચ વિપુલદાનં ન નિગમો
    ન યાગો નો યોગો ન ચ નિખિલભોગોપરમણમ્ ।
જપો નો નો તીર્થં વ્રતમિહ ન ચોગ્રં ત્વયિ
    તપો વિના ભક્તિં તેઽલં ભવભયવિનાશાય મધુહન્ ॥ ૨૯॥

નમઃ સર્વેષ્ટાય શ્રુતિશિખરદૃષ્ટાય ચ નમો
    નમોઽસંશ્લિષ્ટાય ત્રિભુવનનિવિષ્ટાય ચ નમઃ ।
નમોવિસ્પષ્ટાય પ્રણવપરિમૃષ્ટાય ચ નમો
    નમસ્તે સર્વાત્મન્પુનરપિ પુનસ્તે મમ નમઃ ॥ ૩૦॥

કણાન્કશ્ચિદ્વૃષ્ટેર્ગણનનિપુણસ્તૂર્ણમવનેસ્તથા-
    શેષાન્પાંસૂનમિત કલયેચ્ચાપિ તુ જનઃ ।
નભઃ પિણ્ડીકુર્યાદશિરમપિ ચેચ્ચર્મવદિદં
    તથાપીશાસૌ તે કલયિતુમલં નાખિલગુણાન્ ॥ ૩૧॥

ક્વ માહાત્મ્યં સીમોજ્ઝિતમવિષયં વેદવચસાં વિભો
    તે મે ચેતઃ ક્વ ચ વિવિધતાપાહતમિદમ્ ।
મયેદં યત્કિઞ્ચિદ્વદિતમથ બાલ્યેન તુ ગુરો
    ગૃહાણૈતચ્છુદ્ધાર્પિતમિહ ન હેયં હિ મહતામ્ ॥ ૩૨॥

ઇતિ હરિસ્તવનં સુમનોહરં પરમહંસજનેન સમીરિતમ્ ।
    સુગમસુન્દરસારપદાસ્પદં તદિદમસ્તુ હરેરનિશં મુદે ॥ ૩૩॥

ગદારથાઙ્ગામ્બુજકમ્બુધારિણો રમાસમાશ્લિષ્ટતનોસ્તનોતુ નઃ ।
બિલેશયાધીશશરીરશાયિનઃ શિવં સ્તવોઽસ્રમયં પરં હરેઃ ॥ ૩૪॥

પઠેદિમં યસ્તુ નરઃ પરં સ્તવં સમાહિતોઘૌઘઘનપ્રભઞ્જનમ્ ।
સ વિન્દતેઽત્રાખિલભોગસમ્પદો મહીયતે વિષ્ણુપદે તતો ધ્રુવમ્ ॥ ૩૫॥

ઇતિ શ્રીમત્પરમહંસસ્વામિબ્રહ્માનન્દવિરચિતં
શ્રીવિષ્ણુમહિમ્નઃ સ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Ravin Bhalekar ravibhalekarhotmail.com

*Shri Vishnu MahimnaH Stotram*

pdf was typeset on February 18, 2023

Please send corrections to *sanskrit@cheerful.com*